ऋक्षमार्जारवदना: शरभास्या: शुकानना: ।
प्लवगोमायुवक्त्राश्च सरीसृपमुखा: परे ॥
गोरूपा गोमुखा: केचित्तथा पक्षिमुखा: परे ।
महादीर्घा महाह्रस्वा महास्थूला महाकृशा: ॥
पिङ्गाक्षा विरलाक्षाश्च त्र्यक्षैकाक्षा महो-
दरा: ।
एककर्णास्त्रिकर्णाश्च चतुष्कर्णास्तथापरे ।
स्थूलकर्णा दीर्घकर्णा बहुकर्णा विकर्णका: ।
दीर्घाक्षा स्थूलनेत्राश्च सूक्ष्मनेत्रा विहस्तय: ॥
चतुष्पादा: पञ्चपादास्त्रिपादैकपदास्तथा ।
ह्रस्वपादा दीर्घपादा: स्थूलपादा महापदा: ॥
एकहस्ताश्चतुर्हस्ता द्विहस्तास्त्रिशयास्तथा ।
विहस्ताश्च विरूपाश्च गोधिकाकृतय: परे ॥
मनुष्याकृतय: केचित् शिशुमारमुखा: परे ।
क्रौञ्चाकारा बकाकारा हंससारसरूपिण: ॥
तथैव मद्गुरबककङ्ककाकमुखास्तथा ।
अर्द्धनीला अर्द्धरक्ता: कपिला: पिङ्गलास्तथा ॥
नीला: शुक्लास्तथा पीता हरिताश्चित्ररूपिण:।
अवादयन्त ते शङ्खान् पटहान् परिवादिन: ॥
मृदङ्गान् डिण्डिमांश्चैव गोमुखान् पणवांस्तथा ।
सर्व्वे जटाभि: पिङ्गाभिस्तुङ्गाभिश्च कराश्रिता:॥
निरन्तराभिर्व्विप्रेन्द्रा गणा: स्यन्दनगामिन: ।
शूलहस्ता: पाशहस्ता: खड्गहस्ता धनुर्द्धरा:॥
शक्त्यङ्कुशगदाबाणपट्टिसप्रासपाणय: ।
नानायुधा महानादं कुर्व्वन्तस्ते महाबला: ॥
मारय च्छेदयेत्यूचुर्ब्रह्मण: पुरतो गणा: ।
तेषान्तु वदतां तत्र मारय च्छेदयेत्युत ।
योगनिद्राप्रभावात् स विधिर्वक्तुं प्रचक्रमे ॥
अथ ब्रह्माणमाभाष्य तान् दृष्ट्वा मदनो गणान् ।
उवाच वारयन् वक्तुं गणानामग्रत: स्मर: ॥
मदन उवाच ।
किं कर्म्मैते करिष्यन्ति कुत्र स्थास्यन्ति वा
विधे ! ।
किं नामधेया एते वा तत्रैतान् विनियोजय ॥
नियुज्यैतान् निजे कार्य्ये स्थानं दत्त्वा च नाम च ।
ज्ञात्वा पश्चान्महामायाप्रभावं कथयस्व मे ॥”
मार्कण्डेय उवाच ।
“अथ तद्वाक्यमाकर्ण्य सर्व्वलोकपितामह: ।
गणान् समदनानाह तेषां कर्म्मादिकं दिशन्॥
ब्रह्मोवाच ।
“एते तूत्पन्नमात्रा हि मारयेति यदब्रुवन् ।
मुहुर्मुहुरतोऽमीषां नाम मारेति जायताम् ॥
मारात्मकत्वादप्येते मारा: सन्तु च नामत: ।
सदैव विघ्नं जन्तूनां करिष्यन्ति विनार्च्चनम् ।
तवानुगमनं कर्म्म सख्यमेषां मनोभव ! ॥
यत्र यत्र भवान् याता स्वकर्म्मार्थं यदा यदा ।
गन्तारस्तत्र तत्रैते साहाय्याय तदा तदा ॥
चित्तोद्भ्रान्तिं करिष्यन्ति त्वद्वशवशवर्त्तिनाम् ।
ज्ञानिनां ज्ञानमार्गञ्च विघ्नयिष्यन्ति सर्व्वदा ।
यथा सांसारिकं कर्म्म सर्व्वे कुर्व्वन्ति जन्तव: ।
तथा चैते करिष्यन्ति सविघ्नमपि सर्व्वत: ॥
इमे स्थास्यन्ति सर्व्वत्र वेगिन: कामरूपिण: ।

त्वमेवैषां गणाध्यक्ष: पञ्चयज्ञाङ्गभोजिन: ।
नित्यक्रियावतां तोयभोगिनोऽपि भवन्त्विमे ॥”
इति कालिकापुराणे ६ अध्याय: ॥

मारक:, पुं, (म्रियन्ते प्राणिन: यस्मिन् येनेति वा । मृ + घञ् । तत: संज्ञायां कन् ।) मरक: । तत्पर्य्याय: । मारि:२ उत्पात:३ । इति त्रिकाण्डशेष: ॥ पक्षिविशेष: । बाज् इति भाषा । तत्पर्य्याय: । घातिपक्षी २ ग्राहक: ३ । इति भूरिप्रयोग: ॥ मारणकर्त्तरि त्रि ॥

मारजित्, पुं, (मारं कामं जितवान् । जि + क्विप् । तुगागम: ।) बुद्ध: । इत्यमर: । १ । १ । १३ ॥

मारणं, क्ली, (मार्य्यते इति । मृ + णिच् + भावे ल्युट् ।) वध: । इत्यमर: । २ । ८ । ११४ ॥ (यथा, मनौ । ५ । ३८ ।
“यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् ।
वृथापशुघ्न: प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥”)
अभिचारविशेष: । यथा,—
“एवन्तु मारणं देवि ! विशेषात् कथयामि
ते ।
सान्तं वह्निसमायुक्तं वामनेत्रविभूषितम् ॥
कूर्च्चयुग्मं ततो देवि ! अमुकं मारय मारय ।
चतुर्द्दशाक्षरो मन्त्रो स्वाहान्त: शत्रुनाशक: ॥
खदिराङ्गारमादाय कुजाष्टम्यां विशेषत: ।
लेखयेत् पुत्तलीं शत्रुस्वरूपां लौहपत्रके ॥
निशायां मस्तके नेत्रे ललाटे हृदये करे ।
नाभौ गुह्ये कटौ पृष्ठे क्रमोक्तेन पदद्वये ॥
मन्त्रवर्णान् समालिख्य प्रतिष्ठां तत्र कारयेत् ।
संहारमुद्रां बद्ध्वा तु ध्यायेद्देवीं जयप्रदाम् ॥
दीर्घाकारां कृष्णवर्णां सदाङ्कस्तनमस्तकाम् ।
नृमुण्डयुगलं हस्तं चर्व्वयन्तीं दिगम्बरीम् ॥
शत्रुनाशकरीं देवीं ध्यायेत् शत्रुक्षयाय च ।
एवं ध्यात्वेष्टिकाचूर्णैर्व्वामहस्तेन शङ्करि ! ॥
ॐ शत्रुनाशकर्य्यै नम: इति दत्त्वा महेश्वरि ! ।
हरिद्राचूर्णसहितां धारां दद्यादनेन तु ॥
अमुकस्य शोणितं पिब पिबेति ततपरम् ।
मांसं खादय खादय ह्रीँ नम इति मन्त्रम् ॥
मध्याह्ने मध्यरात्रौ तु पूजयित्वा शताष्टकम् ।
जपेदेकादशाहे च रोग: स्यान्नात्र संशय: ॥
एकाधिकैकविंशाहे मृत्युरेव रिपोर्भवेत् ॥ * ॥
अथवान्यप्रकारेण शत्रुक्षयमहं वदे ।
पुंगोशकृत् समादाय पूजयेदुष्णवारिणा ॥
विपरीतक्रमेणैव जपपूजादिकं चरेत् ।
महादेवाय नम इति पुंगोशकृत् समाहरेत् ॥
शिवाय नम इति मन्त्रेण घटनञ्च समाचरेत् ।
पशुपतये नम इति प्राणान् संस्थापयेत्तत: ॥
लौहपात्रे महेशानि ! खदिराङ्गारयोगत: ।
शत्रुप्रतिकृतिं लिख्य तत्र संस्थापयेत् शिवम् ॥
ततो ध्यायेन्महारुद्रं ध्यानन्तु सुसमाहित: ।
शवोर्द्ध्व:स्थितं रुद्रं ज्वलदग्निसमप्रभम् ।
वामहस्तधरं केशं दक्षिणं प्राणकर्षणम् ।
नरचर्म्माम्बरं देवं महाव्यालादिवेष्टितम् ॥
पिनाकधृक् इहागच्छागच्छ इत्यादिनावाह्य
यत्नत: ।
शूलपाणये नम इति स्नापयेत् साधकोत्तम: ॥
महेश्वराय नम इति पाद्यादिना प्रपूजयेत् ।
ईशानादिस्तथा मूर्त्तिर्युतक्रमेण प्रपूजयेत् ॥
अग्निकोणादिपर्य्यन्तं पूर्व्वरीत्या महेश्वरि ! ।
नम: शिवायेति मूलमष्टाविंशति संजपेत् ।
हुँ फमस्त्विति वामेन करेण तु विसर्ज्जयेत् ॥
अजित केशव विष्णो हरे सत्य जनार्द्दन ।
हंस नारायण स्वाहा मन्त्रमेव सञ्जपेत् ॥
हुँ नमो भगवते वासुदेवाय स्वाहा नम इत्यपि
सञ्जपेत् ।
एवमेकादशाहेन शत्रूच्छेदनमञ्जसा ।
अवश्यं जायते देवि ! सत्यं सत्यं त्रिलोचने ! ॥”
इति योगिनीतन्त्रे पूर्व्वखण्डे ४ पटल: ॥
अपि च ।
“एणास्थिश्च गवास्थिञ्च मूत्रनिर्म्माल्यमेव च ।
अरेर्यो निखनेत् द्वारे पञ्चत्वमुपयाति स: ॥”
इति गारुडे १८६ अध्याय: ॥

मारि:, स्त्री, (मार्य्यते इति । मृ + णिच् + इन् ।) मारणम् । वध: । इति मेदिनी । रे, ७७ ॥ जनक्षय: । तत्पर्य्याय: । मारक: २ मरक: ३ उत्पात: ४ । इति त्रिकाण्डशेष: ॥

मारिचिकं, त्रि, (मरिच + “संस्कृतम् ।” ४।४।३ इति ठक् ।) मरिचेन संस्कृतम् । इति सिद्धान्तकौमुदी ॥

मारित:, पुं, (मार्य्यते नाश्यते भस्मीक्रियत इति । मृ + णिच् + कर्म्मणि क्त: ।) नष्टीकृत: । भस्मीकृत: । यथा, भावप्रकाशे ।
“असम्यङ्मारितं स्वर्णं बलं वीर्य्यञ्च नाशयेत् ।
करोति रोगान् मृत्युञ्च तद्धन्यात् यत्नतस्तत:॥”
अपि च ।
“पूर्व्वं वङ्गसमं तालं निम्बूरसेन विमर्द्दयेत् ।
ततो गजपुटे पक्त्वा पुनरम्लेन मर्द्दयेत् ॥
तालेन दशमांशेन याममेकं तत: पुटेत् ।
एवं दशपुटै: पक्वं वङ्गं भवति मारितम् ॥”
अपरञ्च ।
आर्द्रत्वञ्च घनत्वञ्च तेजो गौरवचापलम् ।
यस्यैतानि न दृश्यन्ते तं विद्यान्मृतसूतकम् ॥”
अन्यच्च ।
“शुद्धो रसो भवेद्ब्रह्मा मूर्च्छितस्तु जनार्द्दन: ।
मारितो रुद्ररूपी स्यात् बद्ध: साक्षात् सदा-
शिव: ॥”
इति वैद्यदर्पण: ॥

मारिव्यसनवारक:, पुं,(मारिजन्यं व्यसनं तद्वारयतीति । वृ + णिच् + अण् ।) राजर्षिविशेष: । यथा,—
“कुमारपालश्चौलुक्यो राजर्षि: परमार्हत: ।
मृतस्वमोक्ता धर्म्मात्मा मारिव्यसनवारक: ॥”
इति हेमचन्द्र: । ३ । ३७७ ॥

मारिष:, पुं, (मर्षति दोषानिति । मृष + अच् । निपातनात् सिद्धम् । यद्वा, मा रिष्यति हिनस्ति